नं० ४८६२ – ग

देवीकवचार्गलकीलकस्तोत्राणि

पत्राणि – ५

नं० ४७६२-घ

देवीकवचार्गल कीलकस्तोत्राणि

नं० ४७६२-घ

पत्राणि ५ (पञ्च)

4762

F. = 5

मणिनावलयं वलयेन मणिर्मणिनावलयेन विभाति करः ऊर्मिभिर्हि वनं न वनैः ऊर्मि
ऊर्मिमैः स्ववनैः स्वविभाति सरः । शशिना नु निशा निशया च शशी शशिना निशया
च विभाति खं पठनेन मतिर्मतिना पठनं मतिना पठनेन विभाति श्रुतम ॥२॥

३१२

गजा मोडुवेरा

ॐ श्रीगणेशाय नमः ॐ अस्य श्रीदेव्यकवचमालामंत्रमोगात्मस्य ब्रह्माऋषिः
चामुण्डा देवता श्रीमहालक्ष्मीप्रीत्यर्थे पाठे विनियोगः मा दे उ वा यद्गु
ह्यं परमं लोके सर्वरक्षाकरं नृणां यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह १
श्रीब्रह्मोवाच अस्ति गुह्यतमं विप्र सर्वभूतोपकारकं देव्यास्तु कवचं पुण्यं तच्छृ
णुष्व महामुने २ प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी तृतीयं चन्द्रघण्टेति कू
ष्माण्डेति चतुर्थकं ३ पंचमं स्कन्दमातेति षष्ठं कात्यायनीति च सप्तमं कालरात्रि
महागौरीति चाष्टमं ४ नवमं सिद्धिदा प्रोक्ता नवदुर्गाः प्रकीर्तिताः उक्तान्येता
नि नामानि ब्रह्मणैव महात्मना ५ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे विष
मे दुर्गमे चैव भयार्ताः शरणं गताः ६ न तेषां जायते किंचिदशुभं रणसंकटे नाप
देतस्य पश्यामि शोकदुःखभयं नहि ७ यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते

प्रेतसंस्थातुचामुंडावाराहीमहिषासना ८ ऐंद्रीगजसमारूढावैष्णवीगरुडासना
माहेश्वरीवृषारूढाकौमारीशिखिवाहना ९ लक्ष्मीपद्मासनादेवीपद्महस्ताहरि
प्रिया श्वेतरूपधरादेवीईश्वरीवृषवाहना १० ब्राह्मीहंससमारूढासर्वाभरणभू
षिता नानाभरणशोभाढ्यानानारत्नोपशोभिता ११ दृश्यंतेरथमारूढादेव्यः
क्रोधसमाकुलाः शंखंचक्रंगदांशक्तिंहलंचमुसलायुधं १२ खेटकंतोमरंचैवप
रशुंपाशमेवच कुंतायुधंत्रिशूलंचशार्ङ्गमायुधमुत्तमं १३ दैत्यानांदेहनाशायभ
क्तानामभयायच धारयंत्यायुधानीत्थंदेवानांचहितायवै १४ नमस्तेस्तुमहारौ
द्रेमहाघोरपराक्रमे महाबलेमहोत्साहेमहाभयविनाशिनि १५ त्राहिमांदे
विदुःप्रेक्ष्येशत्रूणांभयवर्द्धिनि प्राच्यांरक्षतुमामैंद्रीआग्नेय्यामग्निदेवता १६ दक्षि
णेस्यांतुवाराहीनैर्ऋत्यांखड्गधारिणी प्रतीच्यांवारुणीरक्षेद्वायव्यांमृगवाहिनी
उदीच्यांपातुकौमारीऐशान्यांशूलधारिणी ऊर्ध्वंब्रह्माणीमेरक्षेदधस्ताद्वैष्णवीत

दे॰ क॰ २

या १८ एवंदशदिशोरक्षेच्चामुंडाशववाहना जयामेचाग्रतःस्यात्तुविजयास्यात्तु
पृष्ठतः १९ अजितावामपार्श्वेतुदक्षिणेचापराजिता शिखांमेद्योतिनीरक्षेदुमामू
र्ध्निव्यवस्थिता २० मालाधरीललाटेचभ्रुवोरक्षेद्यशस्विनी त्रिनेत्राचभ्रुवोर्मध्येयमघं
टाचनासिके २१ शंखिनीचक्षुषोर्मध्येश्रोत्रयोर्द्वारवासिनी कपोलौकालिकारक्षेत्क
र्णमूलेतुशांकरी २२ नासिकायांसुगंधाचउत्तरोष्ठेतुचर्चिका अधरेचामृतकलाजि
ह्वायांचसरस्वती २३ दंतान्रक्षतुकौमारीकंठमध्येतुचंडिका घंटिकांचित्रघंटाचम
हामायाचतालुके २४ कामाक्षीचिबुकंरक्षेद्वाचंमेसर्वमंगला ग्रीवायांभद्रकाली
चपृष्ठवंशेधनुर्द्धरी २५ नीलग्रीवाबहिःकंठेनलिकांनलकूबरी खड्गधारिण्युभौस्कं
धौबाहूमेवज्रधारिणी २६ हस्तयोर्दंडिनीरक्षेदंबिकाचांगुलीषुच नखान्शूलेश्व
रीरक्षेत्कुक्षौरक्षेन्नलेश्वरी २७ स्तनौरक्षेन्महादेवीमनःशोकविनाशिनी हृदयेललिता २
देवीउदरेशूलधारिणी २८ नाभौचकामिनीरक्षेद्गुह्यंगुह्येश्वरीतथा कट्यांभगवतीर

क्षेज्जानुनीविंध्यवासिनी पूतनाकामिकामेढ्रेगुदेमहिषवाहिनी जंघेमहाबलाशोक्ता
सर्वकामफलप्रदा २० गुल्फयोर्नारसिंहीचपादपृष्ठेमितौजसी पादांगुलीःश्रीधरीच
पादाधःस्थलवासिनी २१ दंष्ट्राकरालिनीरक्षेत्केशांश्चैवोर्द्धकेशिनी रोमकूपानिकौ
मारीत्वचंवागेश्वरीतथा २२ रक्तमज्जावसामांसमस्थिमेदांसिपार्वती अंत्राणिकाल
रात्रीचपित्तंचमुकुटेश्वरी २३ पद्मावतीपद्मकोशेकफेचूडामणिस्तथा ज्वालामुखी
नखज्वालामभेद्यासर्वसंधिषु २४ शुक्रंब्रह्माणिमेरक्षेच्छायांछत्रेश्वरीतथा अहंकारं
मनोबुद्धिंधर्मंचधर्मचारिणी २५ प्राणापानौतथाव्यानमुदानंचसमानकं वज्रहस्ता
चमेरक्षेत्प्राणंकल्याणशोभनं २६ रसेरूपेचगंधेचशब्देस्पर्शेचयोगिनी सत्वंरजस्तमश्चै
वरक्षेन्नारायणीतथा २७ आयुर्मेरक्षवाराहीधर्मंरक्षतुवैष्णवी वित्तंचरक्षलिंहाणीयशः
कीर्तिंचबलंचमे २८ मेधांधृतिंस्मृतिंपुष्टिंलक्ष्मींरक्षतुवैष्णवी गोत्रमिंद्राणिमेरक्षेत्पशू
न्रक्षचंडिके २९ पुत्रान्रक्षेन्महादेवीभार्यांरक्षतुभैरवी पंथानंविपथारक्षेन्मार्गंक्षे

दु॰क॰
३

ंकरीतथा ४० लक्ष्मीराजकुलेरक्षेद्राघवीसर्वसंधिषु रक्षाहीनंतुयत्स्थानंवर्जितंक
वचेनतु ४१ तत्सर्वंरक्षमेदेवीजयंतीपापनाशिनी पदमेकंनगच्छेत्तुयदीच्छेच्छुभमात्
मनः ४२ कवचेनावृतोनित्यंयत्रयत्राधिगच्छति तत्रतत्रार्थलाभश्चविजयःसर्वकामि
कः ४३ यंयंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितं परमैश्वर्यमतुलंप्राप्नोतिविपुलंश्रमा
त्रु ४४ निर्भयोजायतेमर्त्यःसंग्रामेष्वपराजितः त्रैलोक्येचभवेत्पूज्यःकवचेनावृतःपु
मान् ४५ इदंतुदेव्याःकवचंदेवानामपिदुर्लभं यःपठेत्प्रयतोनित्यंत्रिसंध्यंश्रद्धयान्वि
तः ४६ दैवीकलाभवेत्तस्यत्रैलोक्येष्वपराजितः जीवेद्वर्षशतंसाग्रमपमृत्युविवर्जितः
४७ नश्यंतिव्याधयःसर्वेलूताविस्फोटकादयः स्थावरंजंगमंचैवकृत्रिमंचापियद्विषं
४८ अभिचाराणिसर्वाणिमंत्रयंत्राणिभूतले भूचराःखेचराश्चैवजलजाश्चोपदेशिकाः
४९ सर्वदाकुशलामालाडाकिनीशाकिनीतथा अंतरिक्षचराघोराडाकिन्यश्चमहाब
लाः ५० ग्रहभूतपिशाचाश्चयक्षगंधर्वराक्षसाः ब्रह्मराक्षसवेतालाःकूष्माण्डाभैरवादयः

५१ नशयंतिदृशोनाम्नस्यकवचेहृदिसंस्थिते मानोन्नतिर्भवेद्राज्ञांतेजोवृद्धिकरंपरं ५२
यशसावर्द्धतेसोपिकीर्तिमंडितभूतले जपेत्सप्तशतींचंडींकृत्वातुकवचंपुरा ५३ यावा
वद्भूमंडलंधत्तेसशैलवनकाननं तावत्तिष्ठतिमेदिन्यांसंततिःपुत्रपौत्रकी ५४ देहांते
परमंस्थानंयत्सुरैरपिदुर्लभं प्राप्नोतिपुरुषोनित्यंमहामायाप्रसादतः ५५ तस्माज्ज
पेत्सदानित्यंकवचंकामदंशुभे ५६ इ ग ग रु र ल · वि दे वं
चं सा म ॰ श्र ह वा जयंतीमंगलाकालीभद्रकाली
कपालिनी दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते १ मधुकैटभविद्राविविधा
तृवरदेनमः रूपंदेहिजयंदेहियशोदेहिद्विषोजहि २ महिषासुरनिर्नाशिधूम्राक्षस्यचम
र्दिनि रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ३ चंडमुंडवधेदेविरक्तबीजविनाशिनि रू
पं ४ शुंभस्यचनिशुंभस्यसर्वदैत्यनिपातिनि रूपं ५ वंदितांघ्रियुगेदेविसर्वसौभाग्य
दायिनि रूपं ६ अचिंत्यरूपचरितेसर्वशत्रुविनाशिनि रूपं ७ नतेभ्यःसर्वदाभक्त्या

दु.स.
४

चंडिके व्याधिनाशिनि रूपं ८ स्तुवद्भ्यो भक्तिपूर्वं त्वां चंडिके व्याधिनाशिनि रूपं ९
चंडिके सततं ये त्वामर्चयंतीह भक्तितः रूपं १० देहि सौभाग्यमारोग्यं देहि देवि परं सु
खं रूपं ११ देवि प्रचंडदोर्दंडदैत्यदर्पविनाशिनि रूपं १२ विधेहि द्विषतां नाशं विधेहि
बलमुच्चकैः रूपं १३ विधेहि देवि कल्याणं विधेहि विपुलां श्रियं रूपं १४ सुरासुरशि
रोरत्ननिघृष्टचरणेंबिके रूपं १५ विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं कुरु रूपं १६ प्र
चंडदैत्यदर्पघ्ने चंडिके प्रणताय मे रूपं १७ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि रूपं १८
कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदांबिके रूपं १९ हिमाचलसुतानाथसंस्तुते परमेश्व
रि रूपं २० इंद्राणीपतिसद्भावपूजिते परमेश्वरि रूपं २१ देवि भक्तजनोद्दामदत्तानंदोद
येंबिके रूपं २२ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं तारिणीं दुर्गसंसारसागरस्य
कुलोद्भवां इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः सप्तशतीं समाराध्य वरमाप्नोति
संपदः २४ ३ र्गा स्तुतिः ॥३॥ श्र ह च विशुद्धज्ञानदेहाय त्रिवेदीदिव्यच ४

5

क्षुषे श्रेयःप्राप्तिनिमित्तायनमःसोमार्द्धधारिणे १ सर्वमेतद्विनायस्तुमंत्राणामपि
कीलकं सोपिक्षेममवाप्नोतिसततंजाप्यतत्परः २ सिद्ध्यंत्युच्चाटनादीनिवस्तूनिसक
लान्यपि एतेनस्तुवतांदेविस्तोत्रमंत्रेणसिद्ध्यति ३ नमंत्रोनौषधंतत्रनकिंचिदपिविद्य
ते विनाजाप्येनसिद्ध्येतसर्वमुच्चाटनादिकं ४ समग्राण्यपिसिद्ध्यंतिलोकशंकामिमां
मोहरः कृत्वानिमंत्रयामाससर्वमेवमिदंशुभं ५ स्तोत्रंवैचंडिकायास्तुतच्चगुह्यंचकार
सः समवाप्नोतिपुण्येनतांयथावन्निमंत्रणां ६ सोपिक्षेममवाप्नोतिसर्वमेवनसंश
यः कृष्णायांवाचतुर्दश्यामष्टम्यांवासमाहितः ७ ददातिप्रतिगृह्णातिनान्यथैषाप्र
सिद्ध्यति इत्थंरूपेणकीलेनमहादेवेनकीलितं ८ योनिष्कीलांविधायैनांनित्यंजप
तिसंस्फुटं ससिद्धःसगणःसोपिगंधर्वोजायतेवने ९ नचैवाप्यटतस्तस्यभयंक्वापि
नजायते नापमृत्युवशंयातिमृतोमोक्षमवाप्नुयात् १० ज्ञात्वाप्रारभ्यकुर्वीतह्यकुर्वा
णोविनश्यति ततोज्ञात्वैवसंपन्नमिदंप्रारभ्यतेबुधैः ११ सौभाग्यादिचयत्किंचिद्दृश्य

~~[illegible]~~ तेतत्तनाजने तत्सर्वं त्वत्प्रसादेन तेनजातमिदं शुभं १२ हीनेत्वज्ज्ञानमार्गेण
मान्त्रिस्मिन्नो त्रैसंपन्निरूचके: भवत्येवममत्वातिततः प्रारब्धमेवतत्र १२ ऐश्वर्यं त्व
त्प्रसादेन सौभाग्यारोग्यसंपदः शत्रुहानिःपरोमोक्ष्यतेसानकिंजनैः १४॥
३ मीत्रम त्वा त स शम्र ॥ पयः पृथिव्यां पयओषधीषु पयोदिव्यन्तरिक्षे पयो
याः पयस्वतीः प्रदिशः सन्तुमह्यम् विष्णोरराटमसिविष्णोः श्नप्त्रेस्थोविष्णोः ध्रुवोसि वैष्णवमसि वि
ष्णवेत्वा
विष्णोस्स्यूरसि ^

य^

फी०
५

राम:
१०